


# Shree Satya Dham Agnimandir

141 White Spruce dr, Coppell, TX, 75019, USA.

## व्याहृति होम

भू: स्वाहा अग्नये इदं न मम | भुव: स्वाहा वायवे इदं न मम |
स्वः स्वाहा सूर्याय इदं न मम | भू र्भु व: स्व: स्वाहा प्रजापतये इदं न मम ॥

## गुरु प्रार्थना

ॐ श्री गुरुभ्यो नमः

ॐ गुरुर्ब्रम्हा गुरुर्विष्णु: गुरुर्देवो महेश्वर: । गुरुर्साक्षात् परब्रह्म तस्मै श्री गुरवे नम: ॥

ब्रह्मानंदं परमसुखदं केवलं ज्ञानमूर्तिम् । द्वन्द्वातीतं गगनसदृशं तत्वमस्यादि लक्ष्यं ।

एकं नित्यं विमलं अचलं सर्वधी साक्षिभूतं । भावातीतं त्रिगुणरहितं सद्गुरुं तन्नमामि ॥

## गुरु स्तुति

ओं नमस्ते श्रीगुरु सर्व लोकाश्रयाय । नमस्ते सद्गुरु विश्वरूपात्मकाय ॥
नमो अद्वैत तत्वाय मुक्तिप्रदाय । नमो सद्गुरु ब्रह्मणे निर्गुणाय ॥ 1 ||
त्वमेकं शरण्यं त्वमेकं वरेण्यम् । त्वमेकं जगत् कारणं विश्वरूपम् ॥
त्वमेकं जगत् कर्तृपाताप्रहर्ता । त्वमेकं परं निश्चलं निर्विकल्पम् ॥ 2 ||
त्वं अचिन्त्यं अव्यक्तं परब्रह्म स्वरूम् । त्वं अनंतं प्रशान्तं अमृतं ब्रह्मरूम् ॥
त्वं आदिमध्यान्तरहितं चिदानन्दरूम् । त्वं सनातनं शाश्वतं ब्रह्मरूपम् ॥ 3 ||
जगद्गुरू विश्वकर्ता महात्मा । सदा संस्थितः हृदये मम ॥
हृदा मनीषः मनसाभिक्लुप्तो । य एतद् विदुर अमृतास्ते भवन्ति ॥ 4 ||
त्वं ईश्वराणां परमं महेश्वरम् । त्वं देवतानां परमं च दैवतम् ॥
परेशं प्रभो सर्व विश्वा प्रकाशी । भवाम्भोधिपोतं शरण्यं व्रजामः ॥
पुनरपि शरण्यं व्रजामः । पुनः पुनरपि शरण्यं व्रजामः || 5 ||

## गणेश स्तुति

ॐ श्री गणेशाय नमः ॥

ॐ गणानां त्वा गणपतिगँ हवामहे कविं कवीनामुपमश्रवस्तमम् ।ज्येष्ठराजं ब्रह्मणाम् ब्रह्मणस्पत आ नः

शृण्वन्नूतिभिःसीदसादनम् ॥ ॐ श्री महागणाधिपतये नमः ॥

## अग्नि आवाहन मंत्र

ॐ चत्वारि शृंगा । त्रयो अस्य पादा । द्वे शीरसे सप्त हस्ताSसो अस्य। त्रिधा भद्धो वृषभो रोरवीति । महोदेवो मर्त्यां आविवेष ॥

## व्याहृति होम

भू: स्वाहा अग्नये इदं न मम | भुव: स्वाहा वायवे इदं न मम | स्वः स्वाहा सूर्याय इदं न मम | भू र्भु व: स्व: स्वाहा प्रजापतये इदं न मम ॥

## पुरुषसूक्त स्वाहाकार्

1. ॐ सहस्रशीर्षा पुरूषः सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशांगुलम् स्वाहा ॥
2. ॐ पुरुष एवेदगं सर्वं यद भूतं यच्च भव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति स्वाहा ॥
3. ॐ एतावानस्य महिमाऽतो ज्यायांस्च पूरुषः । पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि स्वाहा ॥
4. ॐ त्रिपादूर्ध्व उदैच्त्पुरूषः पादोऽस्येहाभवत् पुनः । ततो विष्वङ्व्यक्रामत्साशनानशने अभि स्वाहा ॥
5. ॐ तस्माद्विराळजायत विराजो अधि पूरूषः । स जातो अत्यरिच्यत पश्चाद् भूमिमथो पुरः स्वाहा ॥
6. ॐ यत्पुरूषेण हविषा देवा यज्ञमतन्वत । वसंतो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः स्वाहा ॥
7. ॐ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः । तेन देवा अयजन्त साध्या ऋषयश्च ये स्वाहा ॥
8. ॐ तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् । पशून्ताँश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये स्वाहा ॥
9. ॐ तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत स्वाहा ॥
10. ॐ तस्मादश्वा अजायन्त ये के चोभयादतः । गावोः ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः स्वाहा ॥
11. ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते स्वाहा ॥
12. ॐ ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत स्वाहा ॥
13. ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत स्वाहा ॥
14. ॐ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् स्वाहा ॥
15. ॐ सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् स्वाहा ॥
16. ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः स्वाहा ॥

## विष्णुसूक्त स्वाहाकार्

1. ॐ अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे । पृथिव्याः सप्तधामभिः स्वाहा ॥
2. ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूळहमस्य पागं सुरे स्वाहा ॥
3. ॐ त्रीणि पदा विचक्रमे विष्णुर्गोपा अदोभ्यः । अतोः धर्माणि धारयन् स्वाहा ॥
4. ॐ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पृशे । इन्द्रस्य युज्यः सखा स्वाहा ॥
5. ॐ तद्विष्णोः परमं पदम् सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् स्वाहा ॥
6. ॐ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् स्वाहा ॥

## शांति पाठ्

ॐ भद्रं कर्णेभि: श्रृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्रा: । स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिः व्यशेम देवहितं यदायुः ॥
ॐ स्वस्ति न इंद्रो वृद्धश्रवाः । स्वस्ति न: पूषा विश्ववेदा: । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमि: । स्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ शान्ति: । शान्ति: । शान्ति: ॥

1. ॐ नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि । त्वमेव केवलं कर्तासि । त्वमेव केवलं धर्तासि । त्वमेव केवलं हर्तासि । त्वमेव सर्वं खल्विदं ब्रह्मासि । त्वं साक्षादात्मासि नित्यम् स्वाहा ॥ १ ॥
2. ॐ ऋतं वच्मि । सत्यं वच्मि स्वाहा ॥ २ ॥
3. ॐ अवत्वं माम् । अव वक्तारम् । अव श्रोतारम् । अव दातारम्। अव धातारम् । अवानूचानमव शिष्यम् । अव पश्चात्तात् । अव पुरस्तात् । अवोत्तरात्तात् । अव दक्षिणात्तात् । अव चोर्ध्वात्तात् । अवाधरात्तात् । सर्वतो मां पाहि पाहि समन्तात् स्वाहा ॥ ३ ॥
4. ॐ त्वं वाङ्मयस्त्वं चिन्मय: । त्वं आनन्दमयस्त्वं ब्रह्ममय: । त्वं सच्चिदानन्दाद्वितीयोऽसि । त्वं प्रत्यक्षं ब्रह्मासि । त्वं ज्ञानमयो विज्ञानमयोऽसि स्वाहा ॥ ४ ॥
5. ॐ सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति । सर्वं जगदिदं त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति । त्वं भूमिरापोऽनलोऽनिलो नभ: । त्वं चत्वारि वाक्पदानि स्वाहा॥ ५ ॥
6. ॐ त्वं गुणत्रयातीत: । त्वं देह त्रयातीत: । त्वं कालत्रयातीत: । त्वं मूलाधारस्थितोऽसि नित्यम् । त्वं शक्तित्रयात्मक: । त्वां योगिनो ध्यायन्ति नित्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिंद्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चंद्रमास्त्वं ब्रह्मभूर्भव: स्वरोम् स्वाहा ॥ ६ ॥
7. ॐ गणादिं पूर्वमुच्चार्य वर्णादिं तदनन्तरम् । अनुस्वार: परतर: । अर्धेन्दुलसितम् । तारेण ऋद्धम् । एतत्तव मनुस्वरूपम् । गकार: पूर्वरूपम् । अकारो मध्यमरूपम् । अनुस्वारश्चान्त्यरूपम् । बिन्दुरुत्तररूपम् । नाद: संधानम् । सँ हिता सन्धि: । सैषा गणेशविद्या । गणक ऋषि: । निचरुद् गायत्री छन्दः । गणपतिर्देवता । ॐ गं गणपतयेनम: स्वाहा ॥ ७ ॥
8. ॐ एकदन्ताय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तीः प्रचोदयात् स्वाहा ॥ ८॥
9. ॐ एकदन्तं चतुर्हस्तं पाशमंकुशधारिणम् । रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् । रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् । रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पै: सुपूजितम् । भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् । आविर्भूतं च सृष्ट्याद्यौ प्रकृते: पुरुषात्परम् । एवं ध्यायति यो नित्यं स योगी योगिनां वर: स्वाहा ॥ ९॥
10. ॐ नमो व्रातपतये । नमो गणपतये । नम: प्रमथपतये । नमस्तेऽस्तु लम्बोदराय एकदंताय विघ्ननाशिने शिवसुताय वरदमूर्तये नमो नम: स्वाहा ॥ १० ॥

## फलश्रुति

एतदथर्वशीर्षं योऽधीते । स ब्रह्मभूयाय कल्पते । स सर्वत: सुखमेधते । स सर्वविघ्नैर्न बाध्यते । स पञ्चमहापापात् प्रम्युच्यते । सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायं प्रात: प्रयुञ्जानो अपापो भवति । सर्वत्राधीयानोऽ पविघ्नो भवति । धर्मार्थकाममोक्षं च विन्दति । इदमथर्वशीर्षमशिष्याय न देयम् । यो यदि मोहाद्दास्यति स पापीयान्भवति । सहस्रावर्तनात् यं यं काममधीते । तं तमनेन साधयेत् । अनेन गणपतिमभिषिंचति स वाग्मी भवति । चतुर्थ्यामनश्नञ्जपति स विद्यावान् भवति । इत्यथर्वणवाक्यम् । ब्रह्माद्यावरणं विद्यात् । न बिभेति कदाचनेति । यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति । यो लाजैर्यजति स यशोवान्भवति । स मेधावान्भवति । यो मोदकसहस्रेण यजति । स वांञ्छितफलमवाप्नोति । य: साज्यसमिद्भिर्यजति । स सर्वं लभते स सर्वं लभते । अष्टौ ब्राह्मणान् सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति । सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्ध मन्त्रो भवति । महाविघ्नात्प्रमुच्यते । महादोषात्प्रमुच्यते । महापापात्प्रमुच्यते । स सर्वविद्भवति स सर्वविद्भवति । य एवं वेद । इत्युपनिषद् ॥

## शांति पाठ्

ॐ भद्रं कर्णेभि: श्रृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्रा: । स्थिरैरङगैस्तुष्टुवांसस्तनूभिः व्यशेम देवहितं यदायुः ॥
ॐ स्वस्ति न इंद्रो वृद्धश्रवाः । स्वस्ति न: पूषा विश्ववेदा: । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमि: । स्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ शान्ति: । शान्ति: । शान्ति: ॥

## श्री रुद्र यज्ञ

ॐ इडा देवहूर्मनुर्यज्ञनीर्बृहस्पति रुक्थामदानि शगँसिषद् विश्वेदेवाः सूक्तवाच: पृथिवी मातर्मा मा हिगँसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासगँ शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवंतु शोभायै पितरोऽनुमदन्तु ॥ ॐ शान्ति: शान्ति: शान्ति: ॥

ॐ नमो भगवते रुद्राय ॥ (3 times)

1. ॐ नमस्ते रुद्र मन्यव उतो त इषवे नम: । नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नम: स्वाहा ॥
2. या त इषु: शिवतमा शिवं बभूव ते धनु: । शिवा शरव्या या तव तया नो रुद्र मृडय स्वाहा ॥
3. या ते रुद्र शिवा तनूरघोराऽपापकाशिनी । तया नस्तनुवा शन्तमया गिरिशंताऽभिचाकशीहि स्वाहा ॥
4. यामिषुं गिरिशंतहस्ते बिभर्ष्यस्तवे । शिवां गिरित्र तां कुरु मा हिगूँसी: पुरुषं जगत् स्वाहा ॥
5. शिवेन वचसा त्वा गिरिशाच्छा वदामसि । यथा न: सर्वमिज्जगदयक्ष्मगूँ सुमना असत् स्वाहा ॥
6. अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् । अहीगूँश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः स्वाहा ॥
7. असौ यस्ताम्रो अरुण उत बभ्रु: सुमङ्गल: । ये चेमागूँ रुद्रा अभितो दिक्षु श्रिता: सहस्रशोवैषागूँहेड ईमहे स्वाहा ॥
8. असौ योऽवसर्पति नीलग्रीवो विलोहित: । उतैनं गोपा अदृशन्नदृशन्नुदहार्य: । उतैनं विश्वा भूतानि स दृष्टो मृडयाति न: स्वाहा ॥
9. नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषेऽ | अथो ये अस्य सत्वानोऽ हं तेभ्योऽकरं नम: स्वाहा ॥
10. प्रमुञ्च धन्वनस्त्वमुभयोरार्त्नियोर्ज्याम् । याश्च ते हस्त इषव: परा ता भगवो वप स्वाहा ॥
11. अवतत्य धनुस्त्वगूँ सहस्राक्ष शतेषुधे । निशीर्य शल्यानां मुखा शिवो न: सुमना भव स्वाहा ॥
12. विज्यं धनु: कपर्दिनो विशल्यो बाणवागूँउत । अनेशन्नस्येषव आभुरस्य निषङ्गथि: स्वाहा ॥
13. या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनु: । तयाऽस्मान्विश्व तस्त्वं यक्ष्मया परिब्भुज स्वाहा ॥
14. नमस्ते अस्त्वायुधायानातताय धृष्णवे । उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने स्वाहा ॥
15. परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वत: । अथो य इषुधिस्तवारे अस्मन्निधेहि तम् स्वाहा ॥ 1 ||

1. नमो हिरण्यबाहवे सेनान्ये दिशांच पतये नमो स्वाहा ॥
2. नमो वृक्षेभ्यो हरिकेशेभ्य: पशूनां पतये नमो स्वाहा ॥
3. नम: सस्पिञ्जराय त्विषीमते पथीनां पतये नमो स्वाहा ॥

4. नमो बभ्लुशाय विव्याधिनेऽन्नानां पतये नमो स्वाहा ॥

5. नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो स्वाहा ॥

6. नमो भवस्य हेत्यै जगतां पतये नमो स्वाहा ॥

7. नमो रुद्रायाततताविने क्षेत्राणां पतये नमो स्वाहा ॥

8. नमः सूतायाहन्त्याय वनानां पतये नमो स्वाहा ॥

9. नमो रोहिताय स्थपतये वृक्षाणां पतये नमो स्वाहा ॥

10. नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो स्वाहा ॥

11. नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो स्वाहा ॥

12. नम उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमो स्वाहा ॥

13. नम: कृत्स्नवीताय धावते सत्वनां पतये नम: स्वाहा ॥ 2 ||

1. नम: सहमानाय निव्याधिन आव्याधिनीनां पतये नमो स्वाहा ॥

2. नम: ककुभाय निषङ्गिणेस्तेनानां पतये नमो स्वाहा ॥

3. नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो स्वाहा ॥

4. नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो स्वाहा ॥

5. नमो निचेरवे परिचरायारण्यानां पतये नमो स्वाहा ॥

6. नम: सृकाविभ्यो जिघाँसद्भ्यो मुष्णतां पतये नमो स्वाहा ॥

7. नमोऽसिमद्भ्यो नक्तं चरद्भ्य: प्रकृन्तानां पतये नमो स्वाहा ॥

8. नम उष्णीषिणे गिरिचराय कुलुंचानां पतये नमो स्वाहा ॥

9. नम इषुमद्भ्यो धन्वाविभ्यश्च वो नमो स्वाहा ॥

10. नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो स्वाहा ॥

11. नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो स्वाहा ॥

12. नमोऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो स्वाहा ॥

13. नम आसीनेभ्य: शयानेभ्यश्च वो नमो स्वाहा ॥

14. नम: स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो स्वाहा ॥

15. नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो स्वाहा ॥

16. नम: सभाभ्य: सभापतिभ्यश्च वो नमो स्वाहा ॥

17. नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नम: स्वाहा ॥ 3 ||

1. नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो स्वाहा ॥
2. नम उगणाभ्यस्तृगुँहतीभ्यश्च वो नमो स्वाहा ॥
3. नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो स्वाहा ॥
4. नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो स्वाहा ॥
5. नमो गणेभ्यो गणपतिभ्यश्च वो नमो स्वाहा ॥
6. नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो स्वाहा ॥
7. नमो महद्भ्य: क्षुल्लकेभ्यश्च वो नमो स्वाहा ॥
8. नमो रथिभ्यो रथेभ्यश्च वो नमो स्वाहा ॥
9. नमो रथेभ्यो रथपतिभ्यश्च वो नमो स्वाहा ॥
10. नम: सेनाभ्य: सेनानिभ्यश्च वो नमो स्वाहा ॥
11. नम: क्षत्तृभ्य: संगृहीतृभ्यश्च वो नमो स्वाहा ॥
12. नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो स्वाहा ॥
13. नम: कुलालेभ्य: कर्मारेभ्यश्च वो नमो स्वाहा ॥
14. नम: पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो स्वाहा ॥
15. नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो स्वाहा ॥
16. नमो मृगयुभ्य: श्वनिभ्यश्च वो नमो स्वाहा ॥
17. नम: श्वभ्य: श्वपतिभ्यश्च वो नम: स्वाहा ॥ 4 ||

1. नमो भवाय च रुद्राय च स्वाहा ॥
2. नम: शर्वाय च पशुपतये च स्वाहा ॥
3. नमो नीलग्रीवाय च शितिकण्ठाय च स्वाहा ॥
4. नम: कपर्दिने च व्युप्तकेशाय च स्वाहा ॥
5. नम: सहस्राक्षाय च शतधन्वने च स्वाहा ॥
6. नमो गिरिशाय च शिपिविष्टाय च स्वाहा ॥
7. नमो मीढुष्टमाय चेषुमते च स्वाहा ॥
8. नमो ह्रस्वाय च वामनाय च स्वाहा ॥
9. नमो बृहते च वर्षीयसे च स्वाहा ॥
10. नमो वृद्धाय च संवृध्वने च स्वाहा ॥
11. नमो अग्रियाय च प्रथमाय च स्वाहा ॥
12. नम आशवे चाजिराय च स्वाहा ॥
13. नम: शीघ्रियाय च शीभ्याय च स्वाहा ॥
14. नम ऊर्म्याय चावस्वन्याय च स्वाहा ॥
15. नम: स्त्रोतस्याय च द्वीप्याय च स्वाहा ॥ 5 ||

1. नमो ज्येष्ठाय च कनिष्ठाय च स्वाहा ॥
2. नमः पूर्वजाय चापरजाय च स्वाहा ॥
3. नमो मध्यमाय चापगल्भाय च स्वाहा ॥
4. नमो जघन्याय च बुध्नियाय च स्वाहा ॥
5. नमः सोभ्याय च प्रतिसर्याय च स्वाहा ॥
6. नमो याम्याय च क्षेम्याय च स्वाहा ॥
7. नम उर्वर्याय च खल्याय च स्वाहा ॥
8. नमः श्लोक्याय चाऽवसान्याय च स्वाहा ॥
9. नमो वन्याय च कक्ष्याय च स्वाहा ॥
10. नमः श्रवाय च प्रतिश्रवाय च स्वाहा ॥
11. नम आशुषेणाय चाशुरथाय च स्वाहा ॥
12. नमः शूराय चावभिन्दते च स्वाहा ॥
13. नमो वर्मिणे च वरूथिने च स्वाहा ॥
14. नमो बिल्मिने च कवचिने च स्वाहा ॥
15. नमः श्रुताय च श्रुतसेनाय च स्वाहा ॥ 6 ||

1. नमो दुन्दुभ्याय चाहनन्याय च स्वाहा ॥
2. नमो धृष्णवे च प्रमृशाय च स्वाहा ॥
3. नमो दूताय च प्रहिताय च स्वाहा ॥
4. नमो निषङ्गिणे चेषुधिमते च स्वाहा ॥
5. नमस्तीक्ष्णेषवे चायुधिने च स्वाहा ॥
6. नमः स्वायुधाय च सुधन्वने च स्वाहा ॥
7. नमः स्रुत्याय च पथ्याय च स्वाहा ॥
8. नमः काट्याय च नीप्याय च स्वाहा ॥
9. नमः सूद्याय च सरस्याय च स्वाहा ॥
10. नमो नाद्याय च वैशन्ताय च स्वाहा ॥
11. नमः कूप्याय चावटयाय च स्वाहा ॥
12. नमो वर्ष्याय चावर्ष्याय च स्वाहा ॥
13. नमो मेघ्याय च विद्युत्याय च स्वाहा ॥
14. नम ईध्रियाय चातप्याय च स्वाहा ॥
15. नमो वात्याय च रेष्मियाय च स्वाहा ॥
16. नमो वास्तव्याय च वास्तुपाय च स्वाहा ॥ 7 ||

1. नम: सोमाय च रुद्राय च स्वाहा ॥
2. नमस्ताम्राय चारुणाय च स्वाहा ॥
3. नम: शङ्गाय च पशुपतये च स्वाहा ॥
4. नम उग्राय च भीमाय च स्वाहा ॥
5. नमो अग्रेवधाय च दूरेवधाय च स्वाहा ॥
6. नमो हन्त्रे च हनीयसे च स्वाहा ॥
7. नमो वृक्षेभ्यो हरिकेशेभ्यो स्वाहा ॥
8. नमस्ताराय नमः स्वाहा ॥
9. नम: शंभवे च मयोभवे च स्वाहा ॥
10. नम: शङ्कराय च मयस्कराय च स्वाहा ॥
11. नम: शिवाय च शिवतराय च स्वाहा ॥
12. नमस्तीर्थ्याय च कूल्याय च स्वाहा ॥
13. नम: पार्याय चावार्याय च स्वाहा ॥
14. नम: प्रतरणाय चोत्तरणाय च स्वाहा ॥
15. नम आतार्याय चालाद्याय च स्वाहा ॥
16. नम: शष्प्याय च फेन्याय च स्वाहा ॥
17. नम: सिकत्याय च प्रवाह्याय च स्वाहा ॥ 8 ||

1. नम इरिण्याय च प्रपथ्याय च स्वाहा ॥
2. नम: किगँशिलाय च क्षयणाय च स्वाहा ॥
3. नम: कपर्दिने च पुलस्तये च स्वाहा ॥
4. नमो गोष्ठ्याय च गृह्याय च स्वाहा ॥
5. नमस्तल्प्याय च गेह्याय च स्वाहा ॥
6. नम: काट्याय च गह्वरेष्ठाय च स्वाहा ॥
7. नमो हृदय्याय च निवेष्प्याय च स्वाहा ॥
8. नम: पागँसव्याय च रजस्याय च स्वाहा ॥
9. नम: शुष्क्याय च हरित्याय च स्वाहा ॥
10. नमो लोप्याय चोलप्याय च स्वाहा ॥
11. नम ऊर्व्याय च सूर्म्याय च स्वाहा ॥
12. नम: पर्ण्याय च पर्णशद्याय च स्वाहा ॥
13. नमोऽपगुरमाणाय चाभिघ्नते च स्वाहा ॥
14. नम आक्खिदते च प्रक्खिदते च स्वाहा ॥
15. नमो व: किरिकेभ्यो देवानागँ हृदयेभ्यो स्वाहा ॥
16. नमो विक्षीणकेभ्यो स्वाहा ॥
17. नमो विचिन्वत्केभ्यो स्वाहा ॥
18. नम आनिर्हतेभ्यो स्वाहा ॥
19. नम आमीवत्केभ्यः स्वाहा ॥ 9 ||

1. द्रापे अन्धसस्पते दरिद्रन्नीललोहित । एषां पुरुषाणामेषां पशूनां माभेर्माऽरो मो एषां किं च नाममत् स्वाहा ॥
2. या ते रुद्र शिवा तनू: शिवा विश्वाहभेषजी । शिवा रुद्रस्य भेषजी तया नो मृड जीवसे स्वाहा ॥
3. इमागँ रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहेमतिम् । यथा न: शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् स्वाहा ॥
4. मृडा नो रुद्रो तनो मयस्कृधि क्षयद्वीराय नमसा विधेम ते । यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ स्वाहा ॥

5. मा नो महान्तमुत मा नो अर्भकं मा न उक्षंतमुत मा न उक्षितम् । मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः स्वाहा ॥
6. मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र भामितो वधीर्हविष्मंतो नमसा विधेम ते स्वाहा ॥
7. आरात्ते गोघ्न उत पुरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु । रक्षा च नो अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः स्वाहा॥
8. स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् । मृडा जरित्रे रुद्रस्तवानो अन्यं ते अस्मन्निवपन्तु सेनाः स्वाहा॥
9. परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः । अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय स्वाहा ॥
10. मीढुष्टम शिवतम शिवो नः सुमना भव । परमे वृक्ष आयुधं निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि स्वाहा॥
11. विकिरिद विलोहित नमस्ते अस्तु भगवः । यास्ते सहस्रगँ्हेतयोऽन्यमस्मन्निपन्तु ताः स्वाहा ॥
12. सहस्राणि सहस्रधा बाहुवोस्तव हेतयः । तासामीशानो भगवः पराचीना मुखा कृधि स्वाहा ॥ 10 ||

1. सहस्राणि साहस्रशो ये रुद्रा अधि भूम्याम् । तेषागँ् सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥
2. अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि । तेषागँ् सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥
3. नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः । तेषागँ् सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥
4. नीलग्रीवाः शितिकण्ठा दिवगँ् रुद्रा उपश्रिताः । तेषागँ् सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥
5. ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः । तेषागँ् सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥
6. ये भूतानामधिपतयो विशिखासः कपर्दिनः । तेषागँ् सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥
7. ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् । तेषागँ् सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥
8. ये पथां पथिरक्षय ऐलबृदा यव्युधः । तेषागँ् सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥
9. ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः । तेषागँ् सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥
10. य एतावंतश्च भूयागँ् सश्च दिशो रुद्रा वितस्थिरे । तेषागँ् सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा ॥
11. नमो रुद्रेभ्यो ये पृथिव्यां येंतरिक्षे ये दिवि येषामन्नं वातो वर्षमिषवस्तेभ्यो दशः प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदिचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयंतु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि स्वाहा ॥ 11 ||

## श्री चमक प्रश्न:

ॐ अग्नाविष्णू सजोषसे मा वर्धन्तु वां गिर: । द्युम्नैर्वाजेभिरागतम् ॥

1. वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानस्चश्च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूगुँ षि च मे शरीराणि च मे स्वाहा ॥
2. ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लुप्तं च मे क्लृप्तिश्च मे मतिश्च मे  सुमतिश्च मे स्वाहा ॥
3. शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे स्वाहा ॥
4. ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे स्वाहा ॥
5. आश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यं च मेऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पंतां वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसुच मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे स्वाहा ॥
6. अग्निश्च म इंद्रश्च मे सोमश्च म इंद्रश्च मे सविता च म इंद्रश्च मे सरस्वती च म इंद्रश्च मे पूषा च म इंद्रश्च मे बृहस्पतिश्च म इंद्रश्च मे मित्रश्च म इंद्रश्च मे वरुणश्च म इंद्रश्च मे त्वष्टा च म इंद्रश्च मे धाता च म इंद्रश्च मे विष्णुश्च म इंद्रश्च मेऽश्विनौ च म इंद्रश्च मे मरुतश्च म इंद्रश्च मे विश्वे च मे देवा इंद्रश्च मे पृथिवी च म इंद्रश्च मेऽन्तरिक्षं च म इंद्रश्च मे द्यौश्च म इंद्रश्च मे दिशश्च म इंद्रश्च मे मूर्धा च म इंद्रश्च मे प्रजापतिश्च म इंद्रश्च मे स्वाहा ॥

7. अगँ्शुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपागँ्शुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे स्वाहा ॥

8. इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणाश्च मे स्वरवश्च म उपवरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधवनीयश्च म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे स्वाहा ॥

9. अग्निश्च मे धर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्करीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक्च मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मेऽहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताम् स्वाहा ॥

10. गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे पष्ठवाच्च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे वेहच्च मेऽनड्वाञ्च मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पतां श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतां आत्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पतां स्वाहा ॥

11. एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च म एकविगँ्शतिश्च मे त्रयोविगँ्शतिश्च मे पञ्चविगँ्शतिश्च मे सप्तविगँ्शतिश्च मे नवविगँ्शतिश्च म एकत्रिगँ्शच्च मे त्रयस्त्रिगँ्शच्च मे चतस्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च मे विगँ्शतिश्च मे चतुर्विगं् शतिश्च मेऽष्टाविगँ्शतिश्च मे द्वात्रिगँ्शच्च मे षट्त्रिगँ्शच्च मे चत्वारिगँ्शच्च मे चतुश्चत्वारिगँ्शच्च मेऽष्टाचत्वारिगँ्शच्च मे वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्चाऽऽन्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च स्वाहा ॥

ॐ इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि शगँसिषद् विश्वेदेवाः सूक्तवाच: पृथिवी मातर्मा मा हिगँ्सीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो  वाचमुद्यासगँ् शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवंतु शोभायै पितरोऽनुमदन्तु ॥ ॐ शान्ति: शान्ति: शान्ति: ॥

## देवी अथर्वशीर्ष

1. ॐ सर्वे वै देवा देवीमुपतस्थु: कासि त्वं महादेवीति स्वाहा ॥
2. साब्रवीत् - अहं ब्रह्मस्वरूपिणी । मत्त: प्रकृतिपुरुषात्मकं जगत् । शून्यं चाशून्यं च स्वाहा ॥
3. अहमानन्दानानन्दौ । अहं विज्ञानाविज्ञाने । अहं ब्रह्माब्रह्मणी वेदितव्ये । अहं पञ्चभूतान्य-पञ्चभूतानि । अहमखिलं जगत् स्वाहा ॥
4. वेदोऽहमवेदोऽहम् । विद्याहमविद्याहम् । अजाहमनजाहम् । अधश्चोर्ध्वं च तिर्यक्चाहम् स्वाहा ॥
5. अहं रुद्रेभिर्वसुभिश्चरामि । अहमादित्यैरुत विश्वदेवै: । अहं मित्रावरुणावुभौ बिभर्मि । अहमिन्द्राग्नी अहमश्विनावुभौ स्वाहा ॥
6. अहं सोमं त्वष्टारं पूषणं भगं दधामि । अहं विष्णुमुरुक्रमं ब्रह्माणमुत प्रजापतिम् दधामि स्वाहा ॥
7. अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते । अहं राष्ट्री संङ्गमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् । अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वन्त: समुद्रे । य एवं वेद । स दैवीं सम्पदमाप्नोति स्वाहा ॥
8. ते देवा अब्रुवन् -नमो देव्यै महादेव्यै शिवायै सततं नमः । नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् स्वाहा ॥
9. तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् । दुर्गां देवीं शरणं प्रपद्या-महेऽसुरान्नाशयित्र्यै ते नमः स्वाहा ॥
10. देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति । सा नो मन्द्रेषमूर्जं दूहाना धेनुर्वागस्मानुप सुष्टुतैतु स्वाहा ॥
11. कालरात्रीं ब्रह्मस्तुतां वैष्णवीं स्कन्दमातरम् । सरस्वतीमदितिं दक्षदुहितरं नमामः पावनां शिवाम् स्वाहा ॥
12. महालक्ष्मै च विद्महे सर्वशक्त्यै च धीमहि । तन्नो देवी प्रचोदयात् स्वाहा ॥
13. अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव । तां देवा अन्वजायन्त भद्रा अमृतबन्धवः स्वाहा ॥
14. कामो योनि: कमला वज्रपाणिर्गुहा हसा मातरिश्वाभ्रमिन्द्रः । पुनर्गुहा सकला मायया च पुरुच्यैषा विश्वमातादिविद्योम् स्वाहा ॥
15. एषाऽऽत्मशक्तिः । एषा विश्वमोहिनी । पाशाङ्कुशधनुर्बाणधरा । एषा श्रीमहाविद्या । य एवं वेद स शोकं तरति स्वाहा ॥
16. नमस्ते अस्तु भगवति मातरस्मान् पाहि सर्वतः स्वाहा ॥
17. सैषाष्टौ वसवः । सैषैकादश रुद्राः । सैषा द्वादशादित्याः । सैषा विश्वेदेवाः सोमपा असोमपाश्च । सैषा यातुधाना असुरा रक्षांसि पिशाचा यक्षाः सिद्धाः । सैषा सत्वरजस्तमांसि । सैषा ब्रह्मविष्णुरुद्ररूपिणी । सैषा प्रजापतीन्द्रमनवः । सैषा ग्रहनक्षत्रज्योतिंषि । कलाकाष्ठादिकालरूपिणी । तामहं प्रणौमि नित्यम् स्वाहा॥
18. पापापहारिणिं देवीं भुक्तिमुक्तिप्रदायिनीम् । अनन्तां विजयां शुद्धां शरण्यां शिवदां शिवाम् स्वाहा ॥
19. वियदीकारसंयुक्तं वीतिहोत्रसमन्वितम् । अर्धेन्दुलसितं देव्या बीजं सर्वार्थसाधकम् स्वाहा ॥
20. एवमेकाक्षरं ब्रह्म यतयः शुद्धचेतसः । ध्यायंति परमानन्दमया ज्ञानांबुराशयः स्वाहा ॥

21. वाङ्माया ब्रह्मसूस्तस्मात् शष्ठं वक्त्रसमन्वितम् । सूर्योऽवामश्रोत्रबिंदुसंयुक्तष्टात्तृतीयकः । नारायणेन सम्मिश्रो वायुश्चाधरयुक् ततः । विच्चे नवार्णकोऽर्णः स्यान्महदानन्ददायकः स्वाहा ॥

22. हृत्पुण्डरीकमध्यस्थां प्रातःसूर्यसमप्रभाम् । पाशाङ्कुशधरां सौम्यां वरदाभयहस्तकाम् । त्रिनेत्रां रक्तवसनां भक्तकामदुधां भजे स्वाहा ॥

23. नमामि त्वां महादेवीं महाभयविनाशिनीम् । महादुर्गप्रशमनीं महाकारुण्यरूपिणीम् स्वाहा ॥

24. यस्याः स्वरुपं ब्रह्मादयो न जानन्ति तस्मा-दुच्यते अज्ञेया । यस्या अन्तो न लभ्यते तस्मा-दुच्यते अनन्ता । यस्या लक्ष्यं नोपलक्ष्यते तस्मा-दुच्यते अलक्ष्या । यस्या जननं नोपलभ्यते तस्मा-दुच्यते अजा । एकैव सर्वत्र वर्तते तस्मादुच्यते एका । एकैव विश्वरूपिणी तस्मादुच्यते नैका । अत एवोच्यते अज्ञेयानन्तालक्ष्याजैका नैकेति स्वाहा ॥

25. मंत्राणां मातृका देवी शब्दानां ज्ञानरूपिणी । ज्ञानानां चिन्मयातीता शून्यानां शून्यसाक्षिणी । यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता स्वाहा ॥

26. तां दुर्गां दुर्गमां देवीं दुराचारविघातिनीम् । नमामि भवभीतोऽहं संसारार्णवतारिणीम् स्वाहा ॥

## फलश्रुति

इदंमथर्वशीर्षं योऽधीते स पञ्चाथर्वशीर्षजपफलमाप्नोति । इदमथर्वशीर्षमज्ञात्वा योऽर्चां स्थापयति - शतलक्षं प्रजत्वापि सोऽर्चासिद्धिं न विन्दति । शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः । दशवारं पाठेद्यस्तु सद्यः पापैः प्रमुच्यते । महादुर्गाणि तरति महादेव्याः प्रसादतः । सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायं प्रातः प्रयुञ्जानो अपापो भवति । निशीथे तुरीयसंध्यायां जस्वा वाक् सिद्धिर्भवति । नूतनायां प्रतिमायां जस्वा देवतासान्निध्यं भवति । प्राणप्रतिष्ठायां जस्वा प्राणानां प्रतिष्ठा भवति । भौमाश्विन्यां महादेवीसंनिधौ जस्वा महामृत्युं तरति । स महामृत्युं तरति य एवं वेद । इत्युपनिषत् ॥

1. ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् । चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह स्वाहा ॥
2. तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् स्वाहा ॥
3. अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् । श्रियं देवीमुपह्वये श्रीर्मा देवीजुषताम् स्वाहा ॥
4. कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलंतीं तृप्तां तर्पयन्तीम् । पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् स्वाहा ॥
5. चंद्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् । तां पद्मिनीमीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे स्वाहा ॥
6. आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्व: । तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मी: स्वाहा ॥
7. उपैतुमां देवसख: कीर्तिश्च मणिना सह । प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे स्वाहा ॥
8. क्षुत्पिपासामलां ज्येष्ठाम् अलक्ष्मीं नाशयाम्यहम् । अभूतिमसमृद्धिं च सर्वां निर्णुदमे गृहात् स्वाहा ॥
9. गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् स्वाहा ॥
10. मनस: काममाकूतिं वाच: सत्यमशीमहि । पशूनां रूपमन्नस्य मयि श्री: श्रयतां यश: स्वाहा ॥
11. कर्दमेन प्रजाभूता मयि संभव कर्दम । श्रियं वासय मे कुले मातरं पद्ममालिनीम् स्वाहा ॥
12. आप: सृजंतु स्निग्धानि चिक्लीत वस मे गृहे । नि च देवीं मातरम् श्रियं वासय मे कुले स्वाहा ॥
13. आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् । सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह स्वाहा ॥
14. आर्द्रां य: करिणीं यष्टिं पिङ्गलां पद्ममालिनीम् । चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह स्वाहा ॥
15. तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् स्वाहा ॥
16. य: शुचि: प्रयतो भूत्वा जुहुयादाज्यमन्वहम् । सूक्तं पञ्चदशर्चं च श्री काम: सततं जपेत् ॥

### श्री गणेशाय नमः

### श्रीनारायण उवाच

1. कैलासशिखरे रम्ये शंकरं लोक शंकरम् । कैवल्यचरणं गौरी पप्रच्छ हितमद्भुतम् ॥ १ ॥

### पार्वत्युवाच

2. देवदेव महादेव देवेश वृषभध्वज । त्वत्तः श्रुतान्यशेषाणि जामदग्न्यस्य साम्प्रतम् ॥ २ ॥
3. हरेरंशावतीर्णस्य मन्त्रयन्त्रादिकान्यलम् । न श्रुतं कवचं देव न चोक्तं भवता मम ॥ ३ ॥
4. वक्तुमर्हसि देवेश भक्तायै गुह्यमप्युत । इति पृष्टः स गिरीशो मन्त्रयन्त्राङ्गतत्ववित् ॥ ४ ॥
5. उवाच प्रहसन्देवीं हिताय जगतामिदम् । रहस्यमपि हि ब्रूयुर्लोकैकहितदृष्टयः ॥ ५ ॥

### शिव उवाच

6. श्रुणु प्रिये प्रियमिदं मम गुह्यतरं परम् । धर्मार्थकाममोक्षाणामनायासं सुसिद्धिदम् ॥ ६ ॥
7. एकमौपयिकं मन्ये विष्णुवक्षःस्थलालयाम् । श्रियमाक्रष्टुकामानामिदं कवचमुत्तमम् ॥ ७ ॥
8. एकातपत्रसहितां य इच्छेत्सागराम्बराम् । स जामदग्न्यकवचं नित्यमावर्तयेन्नरः ॥ ८ ॥
9. उद्दण्डशस्त्रदोर्दण्डप्रचण्डरिपुमण्डलम् । कथं जयेयुर्वीरेन्द्राः कवचानावृताङ्गकाः ॥ ९ ॥
10. परप्रयुक्तकृत्यादिदोषा भूतादयोऽपि वा । प्रयान्ति भीता रामस्य वर्मणा वीक्ष्य रक्षितम् ॥ १० ॥
11. किमन्यैः कवचैर्देवि किमन्यैर्मनुभिश्च वा । जामदग्न्यः परं यस्य दैवतं भृत्यवत्सलः ॥ ११ ॥
12. कवचस्यास्य गिरिजे ऋष्यादिन्यासकल्पनम् । मूलमन्त्रोक्तविधिना कारयेत्साधकोत्तमः ॥ १२ ॥
13. (अस्य श्रीभार्गवकवचस्तोत्र मंत्रस्य) अंङ्गिरा ऋषिः बृहती छन्दः । श्रीमाञ्जामदग्न्यो देवता

    (श्रीभार्गवरामप्रीत्यर्थे भार्गवकवचस्तोत्रजपे विनियोगः) ॥ १३ ॥

### अथ करन्यासः

14. रां रामाय नमः अंङ्गुष्टाभ्यां  नमः ॥ १४ ॥
15. रां रामाय नमः तर्जनीभ्यां नमः  ॥ १५ ॥
16. रां रामाय नमः मध्यमाभ्यां नमः ॥ १६ ॥
17. रां रामाय नमः अनामिकाभ्यां नमः ॥ १७ ॥
18. रां रामाय नमः कनिष्टिकाभ्यां नमः ॥ १८ ॥
19. रां रामाय नमः करतलकरपृष्ठाभ्यां नमः॥१९॥

### अथ षडङ्गन्यासः

20. रां रामाय नमः हृदयाय नमः ॥ २१ ॥
21. रां रामाय नमः शिरसे स्वाहा ॥ २२ ॥
22. रां रामाय नमः शिखायै वषट् ॥ २३ ॥
23. रां रामाय नमः कवचाय हुम् ॥  २५ ॥
24. रां रामाय नमः नेत्रत्रयाय वौषट् ॥ २४ ॥
25. रां रामाय नमः अस्त्राय फट् ॥ २६ ॥

## अथः ध्यानं

1. उद्दोर्दण्डचलत्कुठारशिखरस्फारस्फुलिङ्गाङ्कुर । व्रातामोघमहास्त्रनाशित्जगद्विद्वेषिवंशाटवीम्॥
2. वन्दे भार्गवमुग्रकार्मुकधरं शांन्तं प्रसन्नानं । वीरश्रीपरिचुम्ब्यमानमहितस्वब्रह्मतेजोनिधिम् ॥
3. ॐ जामदग्न्य: शिरः पातु पातु मूर्धानमूर्ध्वदृक् । ललाटं ललितः पातु भ्रुवौ भृत्यार्तिनाशनः ॥
4. श्रवसी सुश्रवा मेऽव्यात्कर्णौ कर्णान्तलोचनः । नेत्रे गोत्रार्तिहा मेऽव्याल्लोचने भवमोचनः ॥
5. गण्डे मे खण्डपरशुः कपोलौ पातु शीलवान् । नासे सुनास: पायान्मे, नासिके दासवत्सल: ॥
6. रसनां रसरूपोऽव्याद्रसज्ञां रेणुकासुत: । अधरौ पातु मे नित्यमधरीकृतशात्रवः ॥
7. वक्त्रं चित्रचरित्रोऽव्याद्दन्तान्दन्तींद्रविक्रम: । चुबुकं रिपुजित्पातु ग्रीवां श्रीवत्सलाञ्छन: ॥
8. स्कंधौ मे स्कंदविजयी कक्षे मे क्षत्रियान्तकः । भुजौ मे सततं पातु सहस्रभुज शासन: ॥
9. करौ हितकरः पातु पाणी क्षोणीभरापह: । अंङ्गुलीर्मङ्गलगुणो नखानि मखकृन्मम् ॥
10. वक्षः पातु मभाभीक्ष्णं क्षतजाभिषवप्रियः । उर: पुरुषवीरो मे पार्श्वौ पातु परश्वधी ॥
11. उदरस्थजगत्पायादुदरं मम सर्वदा । भयापहोऽव्यान्नाभिं मे मध्यं निध्यातविष्टपः॥
12. लिङ्गं शंकरशिष्योऽव्यादुपस्थं निस्तुलप्रभः । पाय्वपानं च मे पायात्सायकासनवान्सदा ॥
13. त्रि: सप्तकृत्व: कुलहा त्रिकं मेऽवतु सर्वदा । परमेष्ठ्यवतात्पृष्ठं पिठरं दृढविक्रम: ॥
14. उरु मेरुसम: पातु जानू मे जगतां पति: । जंङ्घे संघातहन्ताव्यात्प्रपदे विपदान्तक: ॥
15. पादौ मे पादचार्यव्याच्चरणौ  करुणानिधि: । पादाङ्गुली: पापहा मे पायात्पादतले पर: ॥
16. परश्वधधर: पायाद्रामः पादनखानि मे । पूर्वाभिभाषी मां पायात्पूर्वस्यां दिशि संततम् ॥
17. दक्षिणस्यामपि दिशि दक्षयज्ञान्तकप्रिय: । पश्चिमस्यां सदा पायात्पाश्चात्याम्बुधिमर्दन: ॥
18. वित्तेशरक्षिताशायां पायान्मां सत्तमार्चित: । सर्वत: सर्वजित्पायान्ममाङ्गानि भयात्प्रभु: ॥
19. मनो महेन्द्रनिलयश्चित्तं मे दृप्तनाशन: । बुद्धिं सिद्धार्चित: पायादहंतामनहंकृति: ॥
20. कर्माणि कार्तवीर्यारिर्हेलां हैहयवंशहा । हरत्वमोघदृङ्भोहं क्रोधं च क्रोधदर्पहा ॥
21. श्रियं करोतु मे श्रीश: पुष्टिं मे पुष्टिवर्धन: । संतानं सततं दद्याद्भृगुसंतानभूरुह: ॥
22. आयूंषि मे वितनुतादार्य: परमपुरुष: । आशां मे पूरयत्वाशु कश्यपार्पितविष्टपः ॥

    श्रीमान्परशुरामो मां पातु सर्वात्मना सदा ॐ ॥

इत्येतत्कवचं दिव्यं अभेद्यं मन्त्रयन्त्रिभिः । कथितं देवि ते गुह्यं प्रियेति परमाद्भुतम् ॥
न नास्तिकाय नादात्रे न चाश्रद्धालवे प्रिये । देयान्नाविनीतायैतन्नाभक्ताय कदाचन ॥
नाजापकाय नाज्ञात्रे नासत्यवचसे क्वचित् । नामालामन्त्रिणे देवि प्रदेयं नाप्यमन्त्रिणे ॥
देयं श्रद्धालवे भक्त्या प्रणताय नतात्मने । गुणान्विताय शुद्धाय मन्त्रगोप्त्रे च मन्त्रिणे ॥
अवश्यमेतज्जप्तव्यं त्रिसंध्यं नियमान्वितैः । मन्त्रावसाने मन्त्रज्ञै रचितं मन्त्रसिद्धये ॥

वर्मैतच्च जपेन्मन्त्री जपेद्वा सततं मनुः । आसेचितादिव तरोर्फलं नाप्नोति सद्रसम् ॥
जयकामो भूर्जपत्रे रक्तबिन्दुभिरुज्ज्वलैः । लिखित्वावर्तयेद्रात्रौ कवचं शतसंख्यया ॥
संपूज्य धूपदीपाद्यैर्ध्यात्वा च हृदि भार्गवम् । हस्ते बध्वा रणं गत्वा विजयश्रियमाप्नुयात् ॥
एवं संप्रस्थितस्यास्य विद्यावादे रणेऽपि वा । वाचस्पतिर्वा शक्रो वा वश्यः स्यात्किमुतापरे ॥
अथवा तिलकं कृत्वा रक्तक्षोदेन भामिनि । कवचेनाभिजप्तेन गच्छञ्जयमवाप्नुयात् ॥

श्रीकामस्तु महेन्द्राद्रेर्द्रोणिं गत्वा मनोहराम् । तत्र मण्डलमास्थाय चण्डभानुं विलोकयन् ॥
जपेदिदं महद्वर्म प्रत्यहं शतसंख्यया । मण्डलान्ते श्रियं श्रेष्ठां लभते भार्गवाज्ञया ॥
सिद्धयो विविधास्तस्य दिव्यज्योतिर्लतालयः । सिध्यन्ति सिद्धवन्द्यस्य कृपया विस्मयावहा: ॥
भूतप्रेतपिशाचाश्च रोगाश्च विविधाशुभाः । दुष्टा नृपास्तस्कराश्च व्याघ्रसिंहगजादयः ॥
श्रीमद्भृगुकुलोत्तंसदंशदंशितमद्रिजे । दृष्ट्वैव हि पलायन्ते मृत्युं दृष्ट्वैव हि प्रजाः ॥

जामदग्न्यस्य यो वाञ्छेत्सान्निध्यं योगिदुर्लभम् । दारिद्र्यदुःखशमनं संसारभयनाशनम् ॥
स महेन्द्रस्य शिखरे स्नात्वोपस्थाय भास्करम् । तन्मध्यवर्तिनं शान्तं जटामण्डलमण्डितम् ॥
परश्वधधनुर्दण्डराजितांसद्वयान्वितम् । अक्षसूत्रं सुबिभ्राणं दक्षिणेऽङ्गुलिपल्लवे ॥
वामजानुतलन्यस्तवामपाणिकुशेशयम् । उन्मज्जज्जलजग्रीवमामीलितविलोचनम् ॥
सुप्रसन्नमुखाम्भोजं सुस्मितं पल्लवाधरम् । सुन्दरं सुंदरापाङ्गं भोगिभोगभुजद्वयम् ॥

भक्तानुग्राहकं देवं जामदग्न्यं जगत्पतिम् । ध्यायन्तमात्मनात्मानं ध्यायेत्प्रणतवत्सलम् ॥
अथ द्वादशभिः पुण्यैर्नामभिः पापहारिभिः । जपतामिष्टदैर्भृत्यपारिजातं समर्चयेत् ॥
जामदग्न्यो जगन्नेता ब्रह्मण्यो ब्रह्मवत्सलः । कार्तवीर्यकुलोच्छेत्ता क्षत्रवंशप्रतापन: ॥
विश्वजिद्दीक्षितो रामः कश्यपाशासुरद्रुमः । परश्वधधरः शान्तो महेन्द्रकृतकेतन: ॥
एतैर्द्वादशभिर्दिव्यैर्गोप्यैरभ्यर्च्य नामभिः । उपतिष्ठेत्पुनर्गुह्यैर्मुख्यैर्नामभिरीश्वरम् ॥
क्षिप्रप्रसादजननैश्चतुर्वर्गफलोदयै: ॥

हन्त ते संप्रवक्ष्यामि तान्यपि प्रणतासि यत् । इमानि गौरी नामानि सुगोप्यानि सतामपि ॥
ॐ हंसस्त्रयीमयो धाता योगीन्द्रहृदयालयः । त्रिधामा त्रिगुणातीतस्त्रिमूर्तिस्त्रिजगन्मयः ॥
नारायण: परं ब्रह्म परं तत्वं परात्परः । भार्गवो धर्मचरणो भर्गरूप: सतां गतिः ॥
इति षोडशभिः स्तुत्वा नामभिर्ऋषिपुंगवम् । सर्वाशिषां पतिं देवं सकलाभीष्टदायकैः ।
आत्मानं विन्यसेदङ्गेष्वनेन कवचेन सः । मृगीमुद्रिकया धीमान्वज्रसारेण सारवित् ॥

दशवारं प्रतिदिनं मासमेकं समाचरेत् । स्वप्ने पश्यति देवेशं भार्गवं भृगुनन्दनम् ॥
चिन्तितार्थप्रदं सौम्यं चिन्तामणिमिवापरम् । मासत्रयं तु विन्यस्ते साक्षात्पश्यति जापकः ॥
मनसः संप्रसादेन लब्ध्वा वरमनुत्तमम् । अणिमादिगुणैर्युक्तो ब्रह्मलोकमवाप्नुयात् ॥
अथवा योगसिद्धिं यो धातुसिद्धिं च वाञ्छति । कुरुक्षेत्रे महेन्द्रे वा जपेदयुतमात्मवान् ।
सर्वाश्चौषधयस्तस्य खेचरत्वादिसिद्धिदाः । रससिद्धिप्रदाश्चापि सिध्यन्त्यस्य न संशयः ॥

महेन्द्राद्रिरिव क्षेत्रं सिद्धिदं नास्ति भूतले । जामदग्न्य इवान्योऽस्ति न देवो भृत्यवत्सलः ॥
प्रस्फुरद्गुणसौवर्णराशीनां जन्मभू: परः । तथेदमिव वर्मान्यद्धर्मादिफलदं न हि ॥
कवचेऽस्मिन्सकृज्जप्ते मन्त्रावृत्तिसहस्रजम् । फलमाप्नोत्यविकलं तस्मान्नित्यं जपेन्नरः ॥
अमन्त्री वापि मन्त्री वा भार्गवे भक्तिमान्नरः । जपेन्नित्यमिदं वर्म मन्त्रसिद्धिमवाप्नुयात् ॥
सारस्वतमिदं देवि कवचं वाक्प्रदं नृणाम् । मूकोऽपि वाग्मी भवति जपन्नेतद्गुरुर्यथा ॥

नित्यं परश्वधभृतः कवचस्यास्य धारणात् । सभासु वदतां श्रेष्ठो राज्ञां भवति च प्रियः ॥
वैदिकं तान्त्रिकं चैव मान्त्रिकं ज्ञानमुत्तमम् । कवचस्यास्य जापी तु ब्रह्मज्ञानं च विन्दति ॥
इत्येतदुक्तं कवचं मया हैहयविद्विषः । गोपनीयमिदं देवि ममात्मासि मणिर्यथा ॥
धन्यं यशस्यमायुष्यं श्रीकरं पुष्टिवर्धनम् । जपतां कवचं नित्यं सर्वसौभाग्यपूरितम् ॥
इति श्रीविष्णुयामले उपरिभागे जामदग्न्यदिव्याञ्जनसिद्धिकल्पे त्रयस्त्रिंशत्पटलः ॥

|| श्री भार्गवार्पणमस्तु ॥

॥ श्री भार्गवकवचंसंपूर्णम् ॥

### गायत्री मंत्र (21 times)

ॐ भू र्भु व: स्व: ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो न: प्रचोदयात्  स्वाहा ॥

### त्रयंबक मंत्र (21 times)

ॐ त्रयंबकैं यजामहे । सुगंधिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान् । मृत्योर्मुक्षीय मामृतात् स्वाहा ॥

### चामुण्डायै मंत्र (108 times)

ॐ ऐं ह्रीं  क्लीं श्रीं चामुण्डायै विच्चे स्वाहा ॥

### पूर्णाहुती मंत्र (Stand for the following verse)

ॐ पूर्णमद: पूर्णमिदं पूर्णात् पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।

ॐ सर्वं वै पूर्णगं स्वाहा ।  *(offer 1/3 of the remaining ghee)*

ॐ सर्वं वै पूर्णगं स्वाहा ।  *(offer 1/2 of the remaining ghee)*

ॐ सर्वं वै पूर्णगं स्वाहा ।  *(offer all of the remaining ghee)*

ॐ शान्ति: शान्ति: शान्ति: ॥

### शांति मंत्र

ॐ असतोमा सद्गमय । तमसोमा ज्योतिर्गमय । मृत्योर्मा अमृतंगमय । ॐ शान्ति: शान्ति: शान्ति: ॥

ॐ सहना ववतु सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विना वधीतमस्तु। मां विद्विषावहै। ॐ शान्ति: शान्ति: शान्ति: ॥

सर्वेऽपि सुखिन: संतु सर्वे सन्तु निरामयाः । सर्वे भद्राणि पश्यंतु, मा कश्चिद् दुःखमाप्नुयात् ।

ॐ शान्ति: शान्ति: शान्ति: ॥

### आग्निसूक्तं

1. ॐ अग्निमीळे पुरोहितं  यज्ञस्य देवं ऋत्विजं । होतारं रत्नधातमं ॥
2. अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत । सदेवां एह वक्षति ॥
3. अग्निना रयिमश्नवत् पोषमेव दिवेदिवे । यशसं वीरवत्तमं ॥
4. अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि । स इद्देवेषु गच्छति ॥
5. अग्निर्होता कविक्रतुः सत्यश्चित्र श्रवस्तमः । देवो देवेभिरा गमत् ॥
6. यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि । तवे तत् सत्यमङ्गिरः ॥
7. उप त्वाSग्ने दिवेदिवे दोषावस्तर् धिया वयं । नमो भरंत एमसि ॥
8. राजंतमध्वराणां । गोपामृतस्य दीदिविं । वर्धमानं स्वेदमे ॥
9. स न: पितेव सूनवेSग्ने सूपायनो भव । सचस्वा नः स्वस्तये॥

### शांति पाठ्

ॐ भद्रं कर्णेभि: श्रृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्रा: । स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिः व्यशेम देवहितं यदायुः ॥

ॐ स्वस्ति न इंद्रो वृद्धश्रवाः । स्वस्ति न: पूषा विश्ववेदा: । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमि: । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्ति: । शान्ति: । शान्ति: ॥

### शांति पाठ्

ॐ द्यौः शान्तिरन्तरिक्षः शांतिः पृथिवि शांतिराप: शांतिरोषधयः शांतिः ।

वनस्पतय: शांतिर् विश्वे देवा: शांतिर् ब्रह्म शांतिः सर्वं शांतिः

शांतिरेव शांतिः सा मा शांतिरेधि । ॐ शान्ति: शान्ति: शान्ति: ॥

### ईशावास्यं

1. ॐ ईशावास्यमिदम् सर्वं यत्किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥
2. हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥
3. पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन् समूह तेजः|यत्ते रूपं कळयाणतमं तत्ते पश्यामि योऽसा वसौ पुरुषः सोऽहमस्मि ॥
4. वायुरनिलममृतमथेदं भस्मान्तगं शरीरम् ।ॐ क्रतो स्मर कृतगं स्मर क्रतो स्मर कृतगं स्मर ॥
5. अग्नेनय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् | युयोध्यस्मज्जुहुराण मेनो भूयिष्ठां ते नम उक्तिं विधेम ॥

### क्षमापण् मंत्र

मंत्र हीनं क्रियाहीनं नजानामी तवार्चनं । पूजांचैव नजानामी नजानामी यजनं तथापि । त्वं कारुण्यभावे मम न्यून्याधिकं सर्वं । क्षमस्वं क्षमस्वं क्षमस्वं ममप्रभो ॥ कायेनवाच मनसैंद्रियैर्य भुध्यात्मनावा प्रकृती स्वभावात् । करोमि यद्यत् सकलं परस्मै श्री चरणार विंदे समर्पयामि ॥

### सप्त श्लोकि

1. यदासृष्टं जगत्सर्वं तदालोक पितामह: | चतुर्वेद समायुक्तं शाश्वतं धर्ममाधिशत् ||
2. किम् सत्कर्म किम् अध्यात्मं यदि विज्ञातु मर्हति | सर्व शास्त्रेषु ग्रंथेषु प्रमाणं परमं श्रुति: ||
3. अस्पष्टंच कदास्पष्टं तत्वज्ञान विवेचनं | अन्यत्र लभ्यते किन्तु प्रमाणं परमं श्रुति: ||
4. आर्ष ग्रन्थेषु सर्वेषु श्रुतिप्रामाण्यमेव च | सर्वत: सारमादद्यान्निजकल्याणहेतवे ||
5. शुष्कवादरता: केचिन्नान्यदस्तीतिवादिन: | सर्वे ते विलयं यान्ति मिथ्याकलहकारिण: ||
6. नास्तिका वेदनिन्दका: पाखंण्डा वेददूषका: । एते सर्वे विनश्यन्ति मिथ्याचारप्रवर्तका: ||
7. यज्ञदानतप:कर्म स्वाध्यायनिरतो भवेत् | एष एव हि श्रुत्युक्त: सत्यधर्मः सनातन: ||

### पंच साधन प्रतिज्ञ

1. यज्ञधर्मं चरामि | दान धर्मं चरामि | तपो धर्मं चरामि | कर्म धर्मं चरामि | स्वाध्याय धर्मं चरामि ||
2. पुनरपि यज्ञ धर्मं चरामि | पुनरपि दान धर्मं चरामि | पुनरपि तपो धर्मं चरामि | पुनरपि कर्म धर्मं चरामि | पुनरपि स्वाध्याय धर्मं चरामि ||
3. पुन: पुनरपि यज्ञ धर्मं चरामि | पुन: पुनरपि दान धर्मं चरामि | पुन: पुनरपि तपो धर्मं चरामि | पुन: पुनरपि कर्म धर्मं चरामि | पुन: पुनरपि स्वाध्याय धर्मं चरामि ||

### त्रिसत्य शरणागति

1. सत्यं शरणं गच्छामि 2. सत्यधर्मं शरणं गच्छामि 3. सत्यधर्मसङ्घं शरणं गच्छामि *(3 times)*

### श्री शिव संकल्प सूक्तं

1. यज्जाग्रतो दूरमुदैतु दैवं तदू सुप्तस्य तथैवैति । दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मन: शिवसंकल्पमस्तु ॥
2. येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वंति विदथेषु धीरा: । यद् पूर्वं यक्षमंत: प्रजानां तन्मे मन: शिवसंकल्पमस्तु ॥
3. यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु । यस्मान्न् ऋते किंचन कर्म क्रियते तन्मे मन: शिवसंकल्पमस्तु ॥
4. येनेदं भूतं भुवनं भविष्यत् परिगृहीममृतेन सर्वं । येन यज्ञस्त्रायते सप्तहोता तन्मे मन: शिवसंकल्पमस्तु ॥
5. यस्मिन् रुच: साम यजूंगषि यस्मिन् प्रतिष्ठिता रशनाभाविवारा: । यस्मिगंष् चित्तं सर्वमोतं प्रजानां तन्मे मन: शिवसंकल्पमस्तु ॥
6. सूषारथिरष्वानिव यं मनुष्यान्नेनीयतेभीषुभिर्वाजिन इव । हृत्प्रतिष्ठं यदजिरं जविष्टं तन्मे मन: शिवसंकल्पमस्तु ॥

### श्री गुरुपादुका स्तोत्रं

1. अनंत संसार समुद्रतारा, नौकायिथाभ्यां गुरु भक्तिथाभ्यां |वैराग्य साम्राज्यध पूजनाभ्यम्, नमो नमः श्री गुरुपादुकाभ्याम् ॥
2. कवित्व वारासि निसागराभ्याम्, दौर्भाग्य दावाम् बुधमालिकाभ्याम् | दूरीकृतानम्र विपथिताभ्याम्, नमो नमः श्री गुरुपादुकाभ्याम् ॥
3. नथा ययो श्रीपतितां समियुः , कदाचिदप्यसु दरिद्र वर्यः |मूकाश्च वाचस्पथिथां हिथाभ्याम्, नमो नमः श्री गुरुपादुकाभ्याम् ॥
4. नालीक नीकास पदाह्रिथाभ्याम्, नाना विमोहाधि निवारिकाभ्याम् |नमः जनाभीष्ट थथि प्रधाभ्याम्, नमो नमः श्री गुरुपादुकाभ्याम् ॥
5. नृपाळि मौलीव्रज रत्न कांति, सरिद्धिराज ज्जशकन्यकाभ्याम् |नृपद्वधाभ्याम् नथलोक पन्ख्थेः , नमो नमः श्री गुरुपादुकाभ्याम् ॥
6. पापांधकारार्क परम्पराभ्याम्, तापथ्रयाहींद्र खगेस्वराभ्यम् |जाढ्याधि संसो शनवाढवाभ्याम् , नमो नमः श्री गुरुपादुकाभ्याम् ॥
7. शमाधि शट्क प्रधवैभवाभ्याम्, समाधि दान व्रथ दीक्षिताभ्याम् |रमाधवांघ्रि स्थिर भक्थिदाभ्याम्, नमो नमः श्री गुरुपादुकाभ्याम् ॥
8. स्वर्चापराणं अखिलेष्टथाभ्याम्, स्वहा सहायाक्ष दुरंधराभ्याम् | स्वांथाच भाव प्रध पूजनाभ्याम्, नमो नमः श्री गुरुपादुकाभ्याम् ॥
9. कामदि सर्प व्रज गारुडाभ्याम्, विवेक वैराग्य निधि प्रदाभ्याम् | भोध प्रधाभ्याम् धृत मोक्षताभ्याम्, नमो नमः श्री गुरुपादुकाभ्याम् ॥

### दुर्गाद्वात्रिंषन्नामावळिः

1. दुर्गा दुर्गार्तिशमनी दुर्गाऽऽ पद्विनिवारिणी । दुर्गमच्छेदिनी दुर्गसाधिनी दुर्गनाशिनी ॥ १ ॥
2. दुर्गतोद्धारिणी दुर्गनिहन्त्री दुर्गमापहा । दुर्गमज्ञानदा दुर्गदैत्यलोकदवानला ॥ २ ॥
3. दुर्गमादुर्गमालोका दुर्गमाऽऽत्मस्वरूपिणी । दुर्गमार्गप्रदा दुर्गमविद्यादुर्गमाश्रिता ॥ ३ ॥
4. दुर्गमज्ञानसंस्थाना दुर्गमध्यानभासिनी । दुर्गमोहा दुर्गमगा दुर्गमार्थ स्वरूपिणी ॥ ४ ॥
5. दुर्गमासुरसंहत्री दुर्गमायुधधारिणी । दुर्गमांङ्गी दुर्गमाता दुर्गम्या दुर्गमेश्वरि ॥ ५ ॥
6. दुर्गभीमा दुर्गभामा दुर्गभा दुर्गदारिणी । नामावलिमिमां यस्तु दुर्गाया सुघी मानवः ॥ ६ ॥
7. पठेत् सर्वभयान्मुक्तो भविष्यति न संशयः । शत्रुभिः पीङ्ञमानो वा दुर्गबन्धगतोपिवा ।
8. द्वात्रिंशन्नामपाठेन मुच्यते नात्र संशयः ॥ ७ ॥

### वेदतत्वदशक

**सत्य** : सत्यस्य नावः सुकृतम्पीपरन् ॥

**अहिंसा** : अनागो हत्य वै भीमा ॥

**दया** : प्रियं सर्वस्य पश्यत उत शूद्र उतार्ये ॥

**शिवसङ्कल्प** : तन्मे मनः शिवसङ्ल्पमस्तु ॥

**दातृत्व** : उतो रयिः पूणतो नोप दस्यति ॥

**पवित्राचरण** : शुद्धाः पूता भवत यज्ञियासः ॥

**ब्रह्मचर्य** : ब्रह्मचर्येण तपसा राजा राष्ट्रं वि रक्षति । आचार्यो ब्रह्मचर्येण ब्रह्मचारिणमिच्छति ॥

**तप** : अतप्ततनूर्न तदामो अश्नुते ॥

**स्वाध्याय** : पावका नः सरस्वती ॥

**ईश्वर प्रणिधान** : महे च न त्वमाद्रिवः पराशुल्काय देयाम् ॥ त्वमस्माकं तव स्मसि ॥

## सूर्योदय अग्निहोत्र मंत्र :

**सूर्याय स्वाहा। सूर्याय इदं न मम॥ प्रजापतये स्वाहा। प्रजापतये इदं न मम॥**

## सूर्यास्तमय अग्निहोत्र मंत्र :

**अग्नये स्वाहा। अग्नये इदं न मम॥ प्रजापतये स्वाहा। प्रजापतये इदं न मम॥**

## सप्त श्लोकि

1. यदासृष्टं जगत्सर्वं तदालोक पितामहः | चतुर्वेद समायुक्तं शाश्वतं धर्ममाधिशत् ||
2. किम् सत्कर्म किम् अध्यात्मं यदि विज्ञातु मर्हति | सर्व शास्त्रेषु ग्रंथेषु प्रमाणं परमं श्रुतिः ||
3. अस्पष्टंच कदास्पष्टं तत्वज्ञान विवेचनं | अन्यत्र लभ्यते किन्तु प्रमाणं परमं श्रुतिः ||
4. आर्ष ग्रन्थेषु सर्वेषु श्रुतिप्रामाण्यमेव च | सर्वतः सारमादद्यान्निजकल्याणहेतवे ||
5. शुष्कवादरताः केचिन्नान्यदस्तीतिवादिनः | सर्वे ते विलयं यान्ति मिथ्याकलहकारिणः ||
6. नास्तिका वेदनिन्दकाः पाखंण्डा वेददूषकाः। एते सर्वे विनश्यन्ति मिथ्याचारप्रवर्तकाः ||
7. यज्ञदानतपःकर्म स्वाध्यायनिरतो भवेत् | एष एव हि श्रुत्युक्तः सत्यधर्मः सनातनः ||

## पंच साधन प्रतिज्ञ

1. यज्ञधर्मं चरामि | दान धर्मं चरामि | तपो धर्मं चरामि | कर्म धर्मं चरामि | स्वाध्याय धर्मं चरामि ||

2. पुनरपि यज्ञ धर्मं चरामि | पुनरपि दान धर्मं चरामि | पुनरपि तपो धर्मं चरामि | पुनरपि कर्म धर्मं चरामि |पुनरपि स्वाध्याय धर्मं चरामि ||

3. पुनः पुनरपि यज्ञ धर्मं चरामि | पुनः पुनरपि दान धर्मं चरामि| पुनः पुनरपि तपो धर्मं चरामि | पुनः पुनरपि कर्म धर्मं चरामि || पुनः पुनरपि स्वाध्याय धर्मं चरामि ||

## त्रिसत्य शरणागति

1. सत्यं शरणं गच्छामि 2. सत्यधर्मं शरणं गच्छामि 3. सत्यधर्मसङ्घं शरणं गच्छामि *(3 times)*

MATERIALS FOR 5AM AGNIHOTRA

1. PYRAMID: A copper pyramid of specific size as electricity, energies and ethers are attracted to the pyramid.
2. RICE: Preferably whole grains of rice are to be used.
3. GHEE: Made from unsalted cow's butter.
4. COW DUNG: Dried chunks or pieces of cow dung. It is available in USA. Cow dung is treated or used as medicine in ancient cultures such as Indians of North or South America, Scandinavians, East or West Europeans, Africans or Asians.
5. MANTRA: Mantra is a very powerful voice/thought combination that is projected and interacts in the entire Agnihotra process.

PROCESS

- Start the fire few minutes ahead of time.
- Now chant the Mantras in the given order to offering Ghee (clarified butter) to the Fire.
- The daily disciplines practiced by many Agnihotris around the world are as follows:
- 4 a.m. 5 a.m. 10 a.m. 12 noon 3 p.m. 9 p.m.

(a few) Mantras & meditation

Mantras ---------- Agnihotra

Vyahruti Homa followed by 15 minutes meditation

Vyahruti Homa followed by 15 minutes chanting of Gayatri mantra

Vyahruti Homa followed by 15 minutes meditation--------- Agnihotra

15 minutes of Om Tryambakam Yajnya

## व्याहृति होम

भू: स्वाहा अग्नये इदं न मम | भुव: स्वाहा वायवे इदं न मम |

स्वः स्वाहा सूर्याय इदं न मम | भू भुं व: स्व: स्वाहा प्रजापतये इदं न मम ॥

## गुरु प्रार्थना

ॐ श्री गुरुभ्यो नमः
ॐ गुरुर्ब्रह्म गुरुर्विष्णु: गुरुर्देवो महेश्वर: । गुरुर्साक्षात् परब्रह्म तस्मै श्री गुरवे नम: ॥
ब्रह्मानंदं परमसुखदं केवलं ज्ञानमूर्तिम् । द्वन्द्वातीतं गगनसदृशं तत्वमस्यादि लक्ष्यं ।
एकं नित्यं विमलं अचलं सर्वधी साक्षिभूतं । भावातीतं त्रिगुणरहितं सद्गुरुं तन्नमामि ॥

## गुरु स्तुति

1. ॐ नमस्ते श्रीगुरु सर्व लोकाश्रयाय । नमस्ते सद्गुरु विश्वरूपात्मकाय ॥
2. नमो अद्वैत तत्वाय मुक्तिप्रदाय । नमो सद्गुरु ब्रह्मणे निर्गुणाय ॥ १ ॥
3. त्वमेकं शरण्यं त्वमेकं वरेण्यम् । त्वमेकं जगत् कारणं विश्वरूपम् ॥
4. त्वमेकं जगत् कर्तृपाताप्रहर्ता । त्वमेकं परं निश्चलं निर्विकल्पम् ॥ २ ॥
5. जगद्गुरू विश्वकर्ता महात्मा । सदा संस्थितः मम हृदये ॥
6. हृदा मनीषः मनसाभिक्लुप्तो । य एतद् विदुर अमृतास्ते भवन्ति ॥ ३ ॥
7. त्वं ईश्वराणां परमं महेश्वरम् । त्वं देवतानां परमं च दैवतम् ॥
8. परेशं प्रभो सर्व विश्वा प्रकाशी । भवाम्भोधिपोतं शरण्यं व्रजामः ॥
9. पुनरपि शरण्यं व्रजामः । पुनः पुनरपि शरण्यं व्रजामः ॥ ४ ॥

## गणेश स्तुति

ॐ श्री गणेशाय नमः ॥
ॐ गणानां त्वा गणपतिगँ हवामहे कविं कवीनामुपमश्रवस्तमम् ।ज्येष्ठराजं ब्रह्मणाम् ब्रह्मणस्पत आ नः शृण्वन्नूतिभिःसीदसादनम् ॥ ॐ श्री महागणाधिपतये नमः ॥

## पूर्णाहुति मंत्र (3 times)

ॐ पूर्णमद: पूर्णमिदं पूर्णात् पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।
ॐ शान्ति: शान्ति: शान्ति: ॥

## शांति मंत्र (3 times each)

ॐ असतोमा सद्गमय । तमसोमा ज्योतिर्गमय । मृत्योर्मा अमृतंगमय ।
ॐ शान्ति: शान्ति: शान्ति: ॥
ॐ सहना ववतु सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विना वधीतमस्तु। मां विद्विषावहै।
ॐ शान्ति: शान्ति: शान्ति: ॥
सर्वेऽपि सुखिन: संतु सर्वे सन्तु निरामयाः । सर्वे भद्राणि पश्यंतु, मा कश्चिद् दुःखमाप्नुयात् ।
ॐ शान्ति: शान्ति: शान्ति: ॥

## गायत्री मंत्र (3 times)

ॐ भू भुं व: स्वः ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो न: प्रचोदयात् स्वाहा ॥

## त्रयंबक मंत्र (11 times)

ॐ त्रयंबकैं यजामहे । सुगंधिं पुष्टिवर्धनम् । उर्वारुकमिव भंन्धनात् । मृत्योर्मुक्षीय मामृतात् स्वाहा ॥

## अग्नि आवाहन मंत्र

ॐ चत्वारि शृंगा । त्रयो अस्य पादा । द्वे शीरसे सप्त हस्ताऽसो अस्य। त्रिधा भद्धो वृषभो रोरवीति । महोदेवो मर्त्यां आविवेष ॥

## सूर्योदय अग्निहोत्र मंत्र

सूर्याय स्वाहा । सूर्याय इदं न मम ॥ प्रजापतये स्वाहा । प्रजापतये इदं न मम ॥

## सूर्यास्तमय अग्निहोत्र मंत्र

अग्नये स्वाहा । अग्नये इदं न मम ॥ प्रजापतये स्वाहा । प्रजापतये इदं न मम ॥

## आग्निसूक्तं

1. ॐ अग्निमीळे पुरोहितं यज्ञस्य देवं ऋत्विजं । होतारं रत्नधातमं ॥
2. अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत । सदेवां एह वक्षति ॥
3. अग्निना रयिमश्नवत् पोषमेव दिवेदिवे । यशसं वीरवत्तमं ॥
4. अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि । स इद्देवेषु गच्छति ॥
5. अग्निर्होता कविक्रतुः सत्यश्चित्र श्रवस्तमः । देवो देवेभिरा गमत् ॥
6. यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि । तवे तत् सत्यमङ्गिरः ॥
7. उप त्वाऽग्ने दिवेदिवे दोषावस्तर् धिया वयं । नमो भरंत एमसि ॥
8. राजंतमध्वराणां । गोपामृतस्य दीदिविं । वर्धमानं स्वेदमे ॥
9. स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये॥

ॐ प्रजापते गजानन ॐ ॥ (11 times)

ॐ स्वामी गजानन ॥ (11 times)

## शांति पाठ्

ॐ भद्रं कर्णेभिः श्रृणुयाम देवा । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥
ॐ स्वस्ति न इंद्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ शान्तिः । शान्तिः । शान्तिः ॥
ॐ ध्यौ शांती । अंतरिक्षं शांती । पृथिवि शांति । रापः शांती । ओषधयः शांतिः ।
वनस्पतयः शांतिर् । विश्वे देवाः शांतिर् । ब्रह्म शांतिः । सर्वं शांतिः ।
शांति रेव शांतिः । सामां शांति रेथि । ॐ शान्तिः शान्तिः शान्तिः ॥

## सप्त श्लोकि

1. यदासृष्टं जगत्सर्वं तदालोक पितामहः | चतुर्वेद समायुक्तं शाश्वतं धर्ममाधिशत् ||
2. किम् सत्कर्म किम् अध्यात्मं यदि विज्ञातु मर्हति | सर्व शास्त्रेषु ग्रंथेषु प्रमाणं परमं श्रुतिः ||
3. अस्पष्टंच कदास्पष्टं तत्वज्ञान विवेचनं | अन्यत्र लभ्यते किन्तु प्रमाणं परमं श्रुतिः ||
4. आर्ष ग्रन्थेषु सर्वेषु श्रुतिप्रामाण्यमेव च | सर्वतः सारमादद्यान्निजकल्याणहेतवे ||
5. शुष्कवादरताः केचिन्नान्यदस्तीतिवादिनः | सर्वे ते विलयं यान्ति मिथ्याकलहकारिणः ||
6. नास्तिका वेदनिन्दकाः पाखंण्डा वेददूषकाः । एते सर्वे विनश्यन्ति मिथ्याचारप्रवर्तकाः ||
7. यज्ञदानतपःकर्म स्वाध्यायनिरतो भवेत् | एष एव हि श्रुत्युक्तः सत्यधर्मः सनातनः ||

### पंच साधन प्रतिज्ञ

1. यज्ञधर्मं चरामि | दान धर्मं चरामि | तपो धर्मं चरामि | कर्म धर्मं चरामि | स्वाध्याय धर्मं चरामि ||

2. पुनरपि यज्ञ धर्मं चरामि | पुनरपि दान धर्मं चरामि | पुनरपि तपो धर्मं चरामि | पुनरपि कर्म धर्मं चरामि |पुनरपि स्वाध्याय धर्मं चरामि ||

3. पुन: पुनरपि यज्ञ धर्मं चरामि | पुन: पुनरपि दान धर्मं चरामि| पुन: पुनरपि तपो धर्मं चरामि | पुन: पुनरपि कर्म धर्मं चरामि || पुन: पुनरपि स्वाध्याय धर्मं चरामि ||

### त्रिसत्य शरणागति

1. सत्यं शरणं गच्छामि 2. सत्यधर्मं शरणं गच्छामि 3. सत्यधर्मसङ्घं शरणं गच्छामि *(3 times)*